# Shri Mahalakshmi Stotram

# શ્રીમહાલક્ષ્મીસ્તોત્રમ્

## Document Information

Text title : mahalakshmIstotramPS

File name : mahalakshmIstotramPS.itx

Category : devii, puShpAshrIvatsan, lakShmI, devI

Location : doc_devii

Author : Pushpa Srivatsan

Transliterated by : N V Vathsan nvvathsan at gmail.com

Proofread by : N V Vathsan nvvathsan at gmail.com

Source : Stotra Pushapavali

Latest update : December 28, 2017

Send corrections to : Sanskrit@cheerful.com

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

Please note that proofreading is done using Devanagari version and other language/scripts are converted using **sanscript**.

September 26, 2021

*sanskritdocuments.org*

# શ્રીમહાલક્ષ્મીસ્તોત્રમ્

ૐ

શ્રીરામજયમ્ ।

ૐ સદ્ગુરુશ્રીત્યાગરાજસ્વામિને નમો નમઃ ।

ૐ શ્રીરૂપાયૈ ચ વિદ્મહે । શુભદાયૈ ચ ધીમહિ ।
તન્નો લક્ષ્મીઃ પ્રચોદયાત્ ॥

શ્રીંબીજપૂજિતે દેવિ હરિવક્ષસ્થલાલયે ।
સર્વસૌમઙ્ગલાધાત્રિ મહાલક્ષ્મિ નમોસ્તુ તે ॥ ૧॥

વિદ્યાલક્ષ્મિ સુધાસારે જ્ઞાનલક્ષ્મિ વસુપ્રદે ।
ભદ્રે લક્ષ્મિ નમસ્તુભ્યં મોક્ષલક્ષ્મિ પ્રસીદ મે ॥ ૨॥

સર્વલક્ષણલક્ષણ્યે  સૌમઙ્ગલ્યસુવિગ્રહે ।
સ્વસ્તિવાક્ શ્રીઃ શુચીરૂપે શાન્તિરૂપે સુખાસ્પદે ॥ ૩॥

અષ્ટૈશ્વર્યપ્રદે લક્ષ્મિ અષ્ટલક્ષ્મિ સુપૂજિતે ।
નિત્યૈશ્વર્યવરે લક્ષ્મિ નિત્યાનન્દસ્વરૂપિણિ ॥ ૪॥

ધનધાન્યસુસન્તાનધૈર્યસૌન્દર્યરૂપિણિ ।
તનુરારોગ્યસૌભાગ્યસાનન્દસિદ્ધિદાયિનિ ॥ ૫॥

ઉષોરાગજયે લક્ષ્મિ ઉષોગાનપ્રસાદિનિ ।
સન્ધ્યાસુરાગસઙ્ગીતે સન્ધ્યાદીપપ્રકાશિનિ ॥ ૬॥

ગીતવાદ્યપ્રિયે લક્ષ્મિ ગતકર્મજસત્પદે ।
ઓઙ્કારસદને માતઃ કુરુદૃષ્ટિપ્રસાદનમ્ ॥ ૭॥

નાદોઙ્કારસ્વરૂપે શ્રીઃ સુનાદસ્વરસાલયે ।
નાદસુસ્વરમાધુર્યે નાદાન્તઃપ્રશમાલયે ॥ ૮॥

મનઃસ્ફૂર્તિકરે લક્ષ્મિ મનઃસારસવાસિનિ ।

મનઃપુષ્પાર્ચિતે માતર્મનોમયમદમ્બિકે ॥ ૯॥

આદિલક્ષ્મિ મદમ્બ ત્વં રક્ષ માં કુરુ ત્વત્કૃપામ્ ।
આધિવ્યાધ્યાર્તિપઙ્કાદ્વિમોચનં કુરુ શાશ્વતમ્ ॥ ૧૦॥

પઙ્કેરુહવિશાલાક્ષિ કટાક્ષેણ વિમોચય ।
સદા માં પાતુ  માલક્ષ્મિ સદા તિષ્ઠ મયા સહ ॥ ૧૧॥

જન્મમૃત્યુજરાતાપજાલાદ્વિમોચનં કુરુ ।
કુરુ મે ત્વયિ લીનં શ્રીઃ કુરુ જન્મનિવારણમ્ ॥ ૧૨॥

ઇહસૌખ્યે સુમાઙ્ગલ્યે પરમોક્ષપ્રદાયિનિ ।
શ્રીમન્નારાયણાનન્દે લક્ષ્મિ તુભ્યં નમો નમઃ ॥ ૧૩॥

મઙ્ગલં શ્રીમહાલક્ષ્મ્યૈ શુભલક્ષ્મ્યૈ સુમઙ્ગલમ્ ।
મઙ્ગલં મઙ્ગલાઙ્ગાયૈ માત્રે નિત્યં સુમઙ્ગલમ્ ॥ ૧૪॥

ત્યાગરાજગુરુસ્વામિશિષ્યાપુષ્પાકૃતસ્તુતિઃ ।
મહાલક્ષ્મીબહુપ્રીતા સુમાઙ્ગલ્યા શુભપ્રદા ॥ ૧૫॥

ઇતિ સદ્ગુરુશ્રીત્યાગરાજસ્વામિનઃ શિષ્યયા ભક્તયા પુષ્પયા કૃતં
શ્રીમહાલક્ષ્મીસ્તોત્રં ગુરૌ સમર્પિતમ્ ।
ૐ શુભમસ્તુ ।

Encoded and proofread by N V Vathsan nvvathsan at gmail.com
Copyright Pushpa Srivatsan

*Shri Mahalakshmi Stotram*

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

pdf was typeset on September 26, 2021

Please send corrections to *sanskrit@cheerful.com*